अनुक्रमांकः ...................................
निरीक्षकस्य हस्ताक्षरम् ........................

Paper Code
BC 101

# पतञ्जलिविश्वविद्यालयः

**परीक्षा - दिसम्बरमासः - 2017**

**एकवर्षीयसेतुपाठ्यक्रमः (सत्रम् : प्रथमम्)**

**संस्कृतम् (प्रथमपत्रम्)**

**संस्कृतव्याकरणम् (क)**

**समयः - होरात्रयम्** **अधिकतमाङ्काः - 75**

**अवधेयम्** : इदं प्रश्नपत्रं पञ्चसप्ततेः (75) अङ्कानां विद्यते। अत्र सरलतमविधिः, अष्टाध्यायी चैतत् खडद्वयं वर्त्तते। प्रत्येकं खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्त्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

**खण्डः - क**

**(सरलतमविधिः प्रथमभागः)** **45 अङ्काः**

**1. केचन त्रयः प्रश्नाः समाधेयाः -** **(5×3=15)**

(क) 'रुणद्धि' इति रूपं ससूत्रं साधयन्तु।
(ख) 'गुरुः' इत्यत्र स्वाद्युत्पत्तिप्रक्रियां दर्शयन्तु।
(ग) कारकं किम्? कतिविधम्? प्रत्येकं सूत्रोदाहरणपुरस्सरं व्याख्यान्तु।
(घ) वर्णानां स्थानानि प्रयत्नांश्च ज्ञापयन्तु।
(ङ) इत्सञ्ज्ञाप्रकरणे आद्यं सूत्रत्रयं व्याख्याय तत्रोपदेशशब्देन किं गृह्यते इति ज्ञापयन्तु।

**2. केचन पञ्च प्रश्नाः समाधेयाः -** **(5×3=15)**

(क) 'नश्चापदान्तस्य झलि' इति सूत्रस्य विभक्तिवचनमर्थोदाहरणञ्च लिखन्तु।
(ख) 'भारतः' इत्यस्य संक्षेपेण विवरणङ्कुर्वन्तु।
(ग) समासाः कतिविधाः? तेषामधिकारान् बोधयन्तु।
(घ) भसञ्ज्ञासूत्रं किम्? अर्थं तस्य ज्ञापयन्तु।
(ङ) कृत्प्रत्ययान्तशब्दयुतानि त्रीणि वाक्यानि लिखन्तु।
(च) 'पुरुषश्शेते' इत्यत्र सन्धिसूत्रं सार्थं ज्ञापयन्तु।
(छ) 'आसीनः' इत्यत्र केन सूत्रेण ईकारादेशः? कतमच्चात्र परिभाषासूत्रमुपयुक्तम्?

**3. केचन पञ्चदश प्रश्नाः समाधेयाः -** **(1×15=15)**

(क) हे अम्ब! इति केन ह्रस्वत्वम्?
(ख) 'भवत' इति कुत्रत्यं रूपम्?
(ग) 'पुत्रीयति' इत्यत्र कस्य धातुसञ्ज्ञा?
(घ) 'पत्रिकाः पठितं सुप्रभया' इति वाक्यं शोधयन्तु।
(ङ) 'सह वीर्यं करवावहै' इत्यत्र कृञ्धातोरात्मनेपदं केन सूत्रेण?
(च) 'आस्यते विष्णुमित्रेण' इत्यत्र कस्मिन्नर्थे लकारः?
(छ) 'पापठ्यते' इत्यस्य कोऽर्थः?
(ज) 'ऐधिषि' इत्यत्र वृद्धिकार्यं केन?

(झ) 'भविष्यति' इत्यत्र विकरणः केन सूत्रेण भवति?
(ञ) 'भविता' इतिप्रयोगे तासस्तिलोपः केन?
(ट) 'पचेयुः' इत्यत्र झेः स्थाने क आदेशः?
(ठ) 'अपीपठत्' इत्यत्र केन द्विर्वचनम्?
(ड) 'पठाम' इत्यत्र लोटि विसर्गस्य श्रवणं कथन्न?
(ढ) 'सर्वा' इति शब्दस्य यथा 'सर्वस्याः' इतिरूपं तथा 'लता' इत्यस्य कुतो न 'लतस्याः'?
(ण) 'कुमार्यौ' इत्यत्र पूर्वसवर्णदीर्घैकादेशः कस्मान्न?
(त) 'धनानि' इत्यत्र केन सर्वनामस्थानसञ्ज्ञा?
(थ) 'मधु पश्य' इत्यत्र कथं न अम्प्रत्ययः श्रूयते?
(द) 'कर्तृ+ङि' इत्यत्र केन गुणकार्यम्?
(ध) 'क्तवतु' इत्यस्यानुबन्धलोपे किं शिष्यते?
(न) सन्प्रत्ययः कस्मिन्नर्थे विधीयते?

## खण्डः - ब
## (अष्टाध्यायी) 30 अङ्काः
## [अध्यायः 1-4]

**4.** (क) चतुर्णां सूत्राणमग्रे दश-दश सूत्राणि लिखन्तु। (5×4=20)

क्षुद्रजन्तवः, आमेतः, तिरोऽन्तर्धौ, तत्र, तेन निर्वृत्तम्, रक्षति।

(ख) द्वयोः सूत्रयोः पूर्त्तिं कुर्वन्तु । ($2\frac{1}{2}$×2=05)

जानपद ................................ , तुमर्थे .................................... ,

विभाषा वृक्ष .................... , न पा .................................... ।

(ग) केषाञ्चित् पञ्चानां सूत्राणामध्यायपादसङ्ख्यां लिखन्तु । (1×5=05)

धारेरुत्तमर्णः, अचो यत्, मध्यान्मः, क्त्वा च

पर्वताच्च, शे, किं क्षेपे, गेहे कः ।

--------------x--------------